National Journal of Hindi & Sanskrit Research

# रूपकेषु प्रकरणम्

**ISSN: 2454-9177**
NJHSR 2016; 1(8): 34-36
© 2016 NJHSR
www.sanskritarticle.com

**श्रीमती शुभासिनी**
शोधच्छात्री,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

**श्रीमती शुभासिनी**

**उपोद्घातः**

जगत् सर्वमिदम् अनुकरणरूपेण अनुसरलरूपेण च चलति। यथा नवजातशिशुः मातरं पितरं दृष्ट्वा परिसरवर्तनां च चेष्टाः अनुकृत्य मध्याह्नभोजनाधिकं स कर्म कर्तु प्रभवति। एवमेव साहित्येऽपि कामपि अवस्थाम् अनुकृत्य यदभिनीयते तद्रूपकमिति प्रसिद्धिं जगाम। अवस्थानुकृतेः परिणाम एव रूपकम्। केवलानुकृतिः नाटयं तत् आभिनीतं चेत् रूपम्। रूपस्य कथालेशेन सम्बन्धे रूपकमिति नाटयस्य परिणामक्रमः। तदुक्तम् **"अवस्थानुकृतिर्नाट्यम्"** रूपं दृश्यतयोच्यते। रूपकं तत् समारोपात् दशधैव रसाश्रयम्। इतिवृत्तभेदं नायकभेदं रसफभेदं च अनुसृत्य रूपकं दशविधं भवति। प्रख्यातं, मिश्रं, कल्पितं च इतिवृत्तं त्रिविधम्। रसाः शृङ्गादयः नव। नायकभेदाः धीरोदात्तादयः चत्वारः। तेषां स्थितिमनुसृत्य रूपकं दशविधं भवति। यथा –

**नाटकं प्रकरणं बाणं प्रहसनं डिमः**
**व्यायोग समवकारौ वीथ्यङ्केहामृगाः।।**[1]

तेषु नाटकं सर्वोत्तमम् इति लाक्षणिकानाम् आभिप्रायः। प्रकरणमपि नाटकात् किञ्चित् भेदवत् सर्वलक्षणपूर्णंच भवित। नाटकें प्रसिद्धं मिश्रं वा इतिवृत्तम्। धीरोधात्तः नायकः, वीरश्रुङ्गारयोः अन्यतररसः। मुखं प्रतिमुखं,गर्भ,अवमर्श, उपसंहृतिः इति पञ्चसन्धयः। न्यूनतया पञ्चाङ्काः। आधिकतया दश च अङ्का भवन्ति। नीरसः, अनुचितश्च वस्तुविस्तरः अर्थोपक्षेपकै सूचनीयः। उदात्तः मधुरश्च दृश्यः। कथाविभागार्थं सन्धिरूपणं कृत्वा एकैकस्य सन्दर्भस्य अङ्कविभागेन कथांशेन समन्वयः कार्यः। प्रत्यङ्कं नेतुः सम्बद्धः अवस्थं काव्यः। तदुक्तम् –

**एकाः चरितैकार्थम् इत्थमासन्ननायकम्।**
**पात्रैः त्रिचतुरैरङ्क तेषामन्तेस्य निर्गमः।।**[2]

नायिका च नाटके स्वीया भवति। निर्वहणसन्धौ अद्भुतोरसः पोषणीयः। कथाविभागे सन्धिषु सूक्ष्मभेद कथांशचलनेन प्रतिसन्धि द्वादश त्रयोदश वा अङ्गानि भवन्ति। एवं पञ्चसन्धीनां चतुष्षष्ठयङ्गानि भवन्ति। सर्वाण्येतानि नाटकलक्षणानि प्रकरणेऽपि ग्रथनीयानि। किन्तु नाटक प्रकरणयोः अयं भेदः –

**"अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम्**
**अमात्य वणिजामेकें कुर्याञ्च नायकम्।**
**धीरप्रशान्त सापायं धर्मकामार्थ तत्परम्**
**शेषं नाटकवत्सन्धि प्रवेशकरसाधिकम्।।**[3]

**Correspondence:**
**श्रीमती शुभासिनी**
शोधच्छात्री,
राष्ट्रियसंस्कृतविद्यापीठम्,तिरूपतिः

वस्तुत्पाद्यं, कथाशरीरं तु यथोचितं कल्पनीयम्। अनार्षबृहत्कथादि। तस्माद्ब्राह्मं वस्तु विप्रवणिजादि नायकनायिकाः। प्रख्यातराजर्षिनिषेधान्नाटकात्प्रकरणस्य वैलक्षण्यम्।प्रकरणं प्रायशो लोकव्यवहारदृष्टम्। दिव्यचरितमलौकिकमिति निषिद्धम्। कञ्चुकप्रभृतयोऽन्तःपुरजनः। तदतिरिक्तो

बाह्यजनश्रेष्टदासादिः प्रवेशकादौ कार्यः । मन्दकुलानां स्त्रीणां चरितं वाऽस्मिन् प्रयोज्यम्। वेश्याकुलस्त्रीयोस्सह समावेशः प्रितषिद्धः। अथवा तयोः प्राधान्येन समावेशः स्यात्। नाटकानीव प्रकरणानि अपरिमित संख्याकानि न लभ्यन्ते। प्रसिद्धानि त्रीण्येव प्रकरणानि अद्य लभ्यन्ते। कालक्रमानुसारेण शारिपुत्रप्रकरणम् अश्वघोषकृतं प्रथमं भवति। द्वितीयं शूद्रकस्य मृच्छकटिकम्, तृतीयं भवभूतेः मालतीमाधवप्रकरणम्। चतुर्थं मल्लिकामारूतमपि प्रसिद्धमेव। पद्मिनीपरिणयादि काश्चित् प्रकरणरणपि लभ्यन्ते।

आचार्य आर्.यस्. वेङ्कटरामशास्त्रिभिः संस्कृतवाङ्मयचरिते कानिचित् प्रकरणानि उदाहृतानि। तथाऽपि तानि नाम्ना श्रूयन्ते। अर्वाचीनत्वेऽपि कवयः केचन मृच्छकटिक, मालतीमाधवादि प्रकरणान्यनुकुर्वन्ति । तत्र क्रैस्तवीयसप्तदशशतकस्य मध्यभागे केरलदेशे कुक्कुटक्रोडाधिपस्य आस्थानपण्डितः उद्दण्डी, दण्डनाथो वा, मल्लिकामारूताख्यं प्रकरणं रचितवान्। यदिदं प्रकरणं मालतीमाधवकथामविकलमनुस्मारयत्यस्मान्। क्रीस्तोःपरं द्वादशशतकस्यान्त्यभागे हेमचन्द्रशिष्यो रामचन्दो जैनतन्त्रप्रवर्तकः कौमुदीमित्रालन्दनाम प्रकरणं महानाटकतुल्यं रचयामास। तस्मिन्नेव समये जैनमहानैय्यायिकस्य जयप्रभुसूरेः शिष्यः रामभद्रमुनिः प्रबुद्धरौहिणेयन्नाम प्रकरणनिबन्धः। तस्मिन्नेव शतके पद्मचन्द्रस्य पुत्रः यशश्चन्द्रनाम मुद्रितकुमुदचन्द्राख्यं प्रकरणं रचितवान्। यस्मिन् श्वेताम्बपाचार्यस्य देवसूरेः, दिगम्बराचार्यस्य, कुमुदचन्द्रस्य च वृत्तं, परस्परविवादमधिकृत्य अन्ततो दिगम्बरपराजयमधिकृत्य च वस्तु निबन्धनिकविः।

प्रसिद्धप्रकरणानां परिचयः संक्षेपेण निरूप्यते। शारिपुत्रप्रकरणं कदाचित् उपलब्धमपि इदानीं न दृश्यम्। तस्य कर्ता अश्वघोषः। तस्य कालः ए.डि. द्वितीयशतकम् (२००) परिचयस्तु वाङ्मय चरित्रकारैः उदाहृत एव गृहीतः।

**शारिपुत्रप्रकरणस्य कथा**

शारिपुत्रप्रकरणस्य शारद्वतिपुत्रप्रकरणमिति नामान्तरम्। शारद्वतीपुत्रस्य ब्राह्मणस्य बौद्धी भवनमत्र कथावस्तु। तथा हि - तरूणस्य मौद्गल्यायनस्य शारिपुत्रस्य च बुद्धेन बौद्धीकरणमेव विषयः। अश्वजिता साकं शारिपुत्राख्यो ब्राह्मणस्सम्भाषमाणो दृश्यते। सम्भाषणावसरे शारिपुत्रसखा विदूषको बुद्धस्योपदेष्टतामाक्षिपति "उपदेशे कथं बुद्धस्याधिकारः, क्षत्रियत्वात्तस्य" इति शारिपुत्रस्तु ब्राह्मणोऽहजात्या उत्कर्षमनभिमन्यमानस्य बुद्धस्योपदेशाधिकारो वर्तते। न ह्यधमजातिना भिषजा प्रदत्तमौषधं रूग्णस्य रोगं नापनुदेत् इति। अनन्तरं शारिपुत्रः प्रियसखेन मौद्गल्यायनेन सार्धं जिनं बुद्धमासाद्यामन्दां बुद्धोपदेश मकरन्द धारामास्वाद्य बौद्धमतमङ्गीचकार। नाटकेऽस्मिन् बुद्धोपदेशझरी सम्यक्तया दृश्यते चित्रितम्। दृश्यन्ते नाटयोक्त लक्षणान्यतिक्रान्तान्येव प्रकरणमिदम्। अङ्का नव । शारिपुत्रश्च नायकः प्रथमं वैधिकधुरन्धरः श्रोत्रियो धीरशान्तः। बुद्धस्तच्छिष्यौ शारिपुत्राश्वजितौ च संस्कृतभाषया व्यवहरन्ति। विदूषकः परं प्रकृतेन अन्ते च भरतवाक्यं दृश्यते। अतश्च अश्वघोषकाले समग्रतया नाटकमासीदिति कीत्। अश्वघोषकालश्च क्रैस्तवीय द्वितीयशतकम्। अनामधेयं नाटकद्वयञ्चाश्वघोषीयं स्यादित्थम्यूहः केवलम्। प्रबोधचन्द्रोदयवदेकं बौद्धमतप्रक्रिया परिष्कृतम्। तत्र बुद्धिः, कीर्तिः, धृतिः, क्षान्तिः इत्येवमादिनि नाटकपात्राणि तादृशं च नाटकं मतसम्बद्धानि नाटकानि इति कथ्यते। अपरमपि बौद्धमतप्रचारणार्थमेव निबद्धम्। तथापि श्रुङगरभासभूयिष्टं धूर्तस्य सोमदत्तस्य राजकुमारस्य धनञ्जयस्य, मगधवत्याः रूपजीवायाश्च परस्परमतीव श्रुङ्गाररसः। नाटकञ्चेदं न समग्रतया किन्तु खण्डश उपलब्धम्। अत्र प्रयुक्तस्य प्राकृतस्य अशोककालिकप्रावकृतस्य चास्ति सम्बन्दो महान्। स्यादर्धमागधी प्रभवस्सः। शौरसेनी चोपयुज्यते। उपजाति, मालिनी, वसन्ततिलका, शार्दूलविक्रीडिताद्या वृत्तविशेषाः वंशस्था, स्रग्धरा सुवदना, प्रहर्षिणी, शिखरिणी, हरिण्यादयश्चोपयुज्यन्ते।

**शूद्रकस्य मृच्छकटिकम्**

तस्य कर्ता शूद्रकः। शातवाहनवंशजः वासिष्टीपुत्रपुलोमाविः एव शूद्रकः इति वाङ्मय चरित्रकाराणां मतम्। तस्य कालः ए.डि. २०४८ इति तेषां निर्णयः। शूद्रकात् पूर्वः भासः चतुरङ्कमितं दरिद्रचारूदत्तमिति नाम्ना नाटकें रचितवान्। किन्तु तत्र कथा न पूर्णा। अतः तत् पूरणार्थं शूद्रकः प्रकरणमिदं रचितवानिति प्रतिभाति। उज्जयिन्यां चारूदत्तः सर्वगुणसम्पन्नः उदारश्च नायकः आसीत्। तस्यां नागर्याम् अतीव सुन्दरी गणिका वसन्तसेनाऽपि वर्तते स्म। चारूदत्तः दाता भूत्वा सम्पदः व्ययीकृतवान्। अतो दरिद्रः आसीत्। सः वसन्तसेनायां जाताभिलाषोऽपि दरिद्रत्वात् तूष्णीं बभूव। किन्तु वसन्तसेना स्वयं चारूदत्तं पतिं कृतवती सा जन्मना गणिकाऽपि गुणैः शीलवती आसीत्। किन्तु राजस्यालकः शकारः तयोः प्रेम न सेहे। तेन उत्पादितात् विवादात् वसन्तसेना चारूदत्तौ दैवयोगेन मोचितौ इति कथांशः। तत् सारं कविः स्वयमेव वर्णितवान्।

**तयोरिदं सत्सुरतोत्सव आश्रयं**
**नयप्रचारं व्यवहारदुष्टतां**
**खलस्वभावं भवितव्यतां तथा**
**चकार सर्वं किल शूद्रकः नृपः॥4**

**मालतीमाधवम् -**

अस्य कर्ता भवभूतिः। ए.डि. ८ शतके अवरतत। प्रकरणस्य नाम्नैव नायकयोः नाम सूचकम्। भूरिश्रववसुरातौ स तीर्थो कामन्दकी तयोः सहाध्यायिनी। गुरूकुले अपत्यनगरे कृतवसतिः। माधवस्य पिता पूर्वा प्रतिज्ञां सार्थकीं कर्तु कामन्दकीं प्रार्थयामास। किन्तु मालत्याः पितुः आश्रयदाता प्रभुः मालतीं स्वविदूषकाय नन्दनाय दापयितुं कृतनिश्चयः। कामन्दकी तां विपत्तिं स्वबुध्या उल्लङ्घ्य नायकयोः विवाहं कारितवती। अघोरघण्टस्य कापालिकस्य शिष्या कपालकुण्डला मालतीम् अपहृत्य देव्यै उपहारीकर्तु कृतप्रयत्ना आपि दैवबलेन विफला बभूव इतिवृत्तसङ्ग्रहः।

मल्लिकामारूतकर्ता उद्दण्डकविः ए.डि.१७ शतके आन्ध्रादेशे अवर्तत। आस्मिन् प्रकरणे दशाङ्काः विद्यन्ते। कल्पितः इतिवृत्तः। मल्लिका नायिका मारूतस्य नायकः एतौ दम्पती। पूर्वस्मिन् जन्मन्यपि दम्पती बभूवतुः। कुन्तलेखरस्य अमात्यः ब्रह्मदत्तः। तस्य पुत्रः मारूतः। सः पित्रा मगधेश्वरस्य चन्द्रवर्मणस्य सकाशं प्रेषितः। चन्द्रवर्मणः पुत्री मल्लिका। मल्लिकायाः सखी मन्दाकिनी। तयोः समागमं कारयितुं कृतयत्ना। आरट्टेश्वरस्य सिंहवर्मणः अमात्यः शम्बरकः राजमुखेन मल्लिकां प्रार्थितवान्। अत्रान्तरे मारूतः सिंहवर्मणा प्रेषितेषु उपायनेषु उत्तरीयं दन्तरण्डं दृष्ट्वा पूर्वजन्मनः स्मरति।
मल्लिका तदानीम् आपि पत्नीति ज्ञातवान्। ततः स्वमित्रस्य गन्धर्वस्य सहायेन अपकारिणं खड्गजिह्व राक्षसं हत्वा मल्लिकां परिणीतवान् इति कथा अत्र वर्णिता।

## पद्मिनी परिणयम्

पद्मिनीपरिणयप्रकरणे दशाङ्का वर्तन्ते। श्रीमद्रामायणयुद्धकाण्डान्तकथा अत्र प्रतीकरूपेण गृहीत। कविरयं १८१६ संवत्सरे हस्तानक्षत्रे कोलम्बो नगरे गतः। १९०० वत्सरे परमपदं प्राप्तवान्।

कासारः कश्चन राजा आसीत्। तस्य पुत्री पद्मिनी। योग्याय वराय कन्या देया इति राज्ञः चिन्ता आसीत्। जीमूतनामकः कासारस्य मित्रं विकृताकारः वृद्धश्च पद्मिनीं प्रार्थयते स्म। राजा मित्रमिति हेतोः प्रत्यक्षं तं तिरस्कर्तुं न शक्तः। अत्रान्तरे कासारः पुत्रस्य कृते कन्यां पुत्रिकायाः कृते वरं च द्रष्टुमिच्छुः। चित्रपटान् आनयामास। तत्र भास्करस्य चित्रं दृष्ट्वा पद्मिनी अनुरक्ता। कुमुदाकरः कौमुदीं नाम्नां कन्यां वृतवान्। जीमूतः कासारं पुनःपुनः निर्बध्नाति। कासारोऽपि कालं यापयति। अत्रान्तरे पद्मिनीभास्करयोः यदृच्छया अन्योन्यदर्शनमभूत्। भास्करः मित्राणां सहायेन जीमूतं पुरोवातं च निर्जित्य पद्मिनीं परिणीतवान्।

श्रीमद्रामायणकथा युद्धकाण्डपर्यन्ता अत्र प्रतीयते। कविरयं रामायणे विद्वान् तत्र तत्र रामायणश्लोकान् उदाहरन्ति। अयम् आञ्जनेयभक्तः। रामादपि आञ्जनेयमेव विशेषेण स्तौति। आपि च लक्ष्म्या आपि भक्तः एव। आञ्जनेयेन सेविता इति लक्ष्म्याम् अस्य गौरवं वर्तते। किन्तु आञ्जनेय एव भक्तरक्षणे समर्थ इति अस्य विश्वासः चतुर्थाङ्के पद्मिन्या "कृतः लक्ष्मीस्तवः मनोहरः"। पञ्चमाङ्केऽपि कुमुदाकरेण कृतलक्ष्मीवस्तवः वर्तते।

**सन्दर्भाः**

१. दशरूपकम् - १/७
२. तत्रैव- ३/३६
३. तत्रैव- ३/३९-४०
४. मृच्छकटिकम् – १/७

**सहायकग्रन्थसूची**

१. दशरूपकम् (धनञ्जयः) - डा. रामजी उपाध्यायः, भारतीयविद्यासंस्थानम्, वारणासी ।

२. ध्वन्यालोकः - आनन्दवर्धनः, चौखम्बासंस्कृतसिरीज आफीस्, वाराणसी, १९९५ ।

३. नाटयशास्त्रम् (भरतमुनिः) - आर्. एस्, नागर, परिमलपब्लिकेसनस्, दिल्ली,२००३ ।

४. मृच्छकटिकम् - महाकविशूद्रकः, चौखम्बासुरभारती प्रकाशनम्, २०१२ ।

५. मालतीमाधवम्- भवभूतिः, भण्डारकर ओरियण्टाल् रिसर्च इन्स्टिच्युट्, पुने, १९७० ।

६. संस्कृतसाहित्येतिहासः -आचार्यरामचन्द्रमिश्रः, चौखम्बाविद्याभवन, वारणासी, २००१ ।

७. संस्कृतनिबन्धशतकम् -डा. कपिलदेवद्विवेदीआचार्य, विश्वविद्यालयप्रकाशन, चौक, वारणासी, त्रयोदशसंस्करण- २००८ ।

८. साहित्यदर्पणः (विश्वनाथकविराजः), शशिकला - हिन्दीव्याख्या - डा.सत्यव्रत सिंहः, चौखम्बाविद्याभवन, वारणासी, विद्याभवनसंस्कृतग्रन्थमाला- २९।